# Mahakala Stotram

# महाकालस्तोत्रम् २

## Document Information

Text title : Mahakala Stotram

File name : mahAkAlastotram2.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,

Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# महाकालस्तोत्रम् २

नमस्यामि महाकालं सर्वसम्पत्तिदायकम् ।
खर्वं लम्बोदरं नीलमष्टनागविभूषितम् ॥ १॥

द्विभुजैकमुखं वीरं कपालकृतशेखरम् ।
व्याघ्रचर्मकटीवेष्टं शतार्धमुण्डमालिनम् ॥ २॥

भावाभावपरिच्छिन्नं जगत्सम्बोधकारकम् ।
सर्वभावात्मकं नाथं जगन्नाथ नमोऽस्तु ते ॥ ३॥

कृष्णवर्णं महातेजं सिद्धसाधकरक्षकम् ।
कर्तिकपालिनं नाथं महाकाल नमोऽस्तु ते ॥ ४॥

व्याघ्रचर्माम्बरधरं महाक्रोधस्वरूपिणम् ।
द्वादशादित्यसङ्काशं महाकाल नमोऽस्तु ते ॥ ५॥

महादंष्ट्राकरालास्यं ललज्जिह्वं सभैरवम् ।
महारक्ताभनयनं महाकाल नमोऽस्तु ते ॥ ६॥

विभ्रन्नरशिरोमालां नागराजविभूषितम् ।
श्मश्रुतुन्दिलकं वन्द्यं महाकाल नमोऽस्तु ते ॥ ७॥

सभ्रूभङ्गं त्रिनेत्रं चैवोर्ध्वपिङ्गोर्ध्वकेसरम् ।
युगान्तानलपुञ्जाभं महाकाल नमोऽस्तु ते ॥ ८॥

त्रासकं सर्वदैत्याना(मस्थ्य)सृङ्मांसभक्षकम् ।
रक्षितारं भक्तिमतां महाकाल नमोऽस्तु ते ॥ ९॥

सिद्धिसाधनमन्त्रस्य विहेठीज्यनराशनम् ।
युग्मस्याश्वासदातारं महाकाल नमोऽस्तु ते ॥ १०॥

संसारजलधेः पारं नौका यानैकगामिनी ।
नौकायाने स्वतेजास्त्वं महाकाल नमोऽस्तु ते ॥ ११॥

महाकालस्तवं चैतद् यः पठेद् भक्तिमान् नरः ।
भयार्तो मुच्यते भीतेररिचिन्ता निवर्तते ॥ १२॥

महाकालं नमस्कृत्य यथोक्तकुलजन्मतः ।
तेन सुजन्मा भवति सर्वसिद्धिपरायणः ॥ १३॥

इति श्रीमहाकालस्तोत्रं सम्पूर्णम् ॥

---

*Mahakala Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*